# संस्कृतवार्ता:

**दिनाङ्क :-27.03.2025**

**प्रात: - 06:55**

**अथ वार्ता:**

**कृष्णाङ्गारसघोषविक्रय:**

**कृष्णाङ्गारमन्त्रालय: अद्य नवदिल्ल्यां वाणिज्यिक-कृष्णाङ्गार-खनि-सघोष-विक्रयणस्य द्वादशं खण्डं उद्घाटयिष्यति। प्रस्तावितखनिषु त्रयोदशखनय: पूर्णरूपेण अन्वेषिता: तत्रैव द्वादशखनय: आंशिकरूपेण अन्वेषिता:। या: तात्कालिकभविष्यस्य विकासाय अवसरप्रदानं करिष्यन्ति। वाणिज्यिक-कृष्णाङ्गार-खनि-सघोष-विक्रयणस्य अस्य भागस्य प्रयोजनम् दैशिकान्ताराष्ट्रियनिवेशकानां ध्यानाकर्षणमिति वर्तते।**

**लोकसभा**

**लोकसभया पञ्चविंशत्यधिक द्विसहस्रतमवर्षं त्रिभुवन-सहकारी-विश्वविद्यालय-विधेयकं पारितम्। विधेयकमिदं त्रिभुवन-सहकारी-विश्वविद्यालय इति नाम्ना प्रसिद्धस्य विश्वविद्यालयस्य रूपेण ग्रामीण-प्रबन्धन-आनन्द-संस्थानस्य स्थापनां कृत्वा तत् राष्ट्रिय-महत्त्वस्य संस्थानरूपेण घोषयितुं प्रयतते। इदं संस्थानं सहकारीक्षेत्रे प्रौद्योगिकी-प्रबन्धन-शिक्षा: प्रशिक्षणं च प्रदास्यति, तथा च सहकारी-अनुसन्धानस्य विकासस्य च प्रोत्साहनं करिष्यति। 'सहकार से समृद्धि' इत्येतां दृष्टिं साधयितुं उत्कृष्टताया: वैश्विकमानकं संस्थापयिष्यति।**

**राज्यसभाविधेयकम्**

**संसदा बैंकिंग-विधि-संशोधन-विधेयकं चतुर्विंशत्यधिकद्विसहस्रतमवर्षीयं पारितम्। राज्यसभया ह्य: अस्मै विधेयकाय स्वीकृति: प्रदत्ता। लोकसभया पूर्वमेव इदं विधेयकं पारितमासीत्। एतस्मिन् विधेयके भारतीयरिजर्वबैंकाधिनियमे चतुस्त्रिंशदधिकनवदशशततमे बैंकिंग विनियमनाधिनियमे नव-चत्वारिंशदधिकनवदशशततमे भारतीय-स्टेट-बैंकाधिनियमे पञ्चपञ्चाशदधिकनवदश-शतमे बैंकिंग-उद्यमे उपक्रमाणां**

अधिग्रहण-हस्तास्तरण सम्बद्धे अधिनियमे सप्तत्यधिकनवदशशततमे च संशोधनस्य प्रावधानं वर्तते। विधेयकस्य लक्ष्यं बैंककोषेषु नामांकितजनेभ्य: वर्तमानविकल्पानां संख्याया: एकत: संवर्ध्य चतु:संख्यापरिमितं यावत् करणमिति वर्तते। वित्तमन्त्रिणा निर्मलासीतारामन् इत्यनया विज्ञापितं यत् देशे बैंकिंग क्षेत्रं प्रबलीकर्तुं अनेका परिष्कारा: संयोजिता:।

## रक्षानुसन्धानम्

रक्षानुसन्धानविकाससङ्घटनं भारतीय-नौसैन्यबलञ्च ह्य: ओडिशाया: तटात् एकीकृतपरीक्षणक्षेत्रात् स्वदैशिकरूपेण विकसितोर्ध्वाररूपेण शॉर्टरेंज-सरफेस-टू एयर-मिसाइल इत्येतस्य प्रक्षेपास्त्रस्य परीक्षणं कृतवती। अनेन प्रक्षेपास्त्रप्रणाल्या: समीपसीमानिम्नोर्ध्वता क्षमता संस्थापिता।

## बिहार सांसद सम्मेलनम्

वर्षान्ते भविष्यमाणं बिहारविधानसभानिर्वाचनं अभिलक्ष्य ह्य: रात्रिभोजनान्तरं नवदिल्ल्यां भारतीयजनतापार्टीतिदलस्य सांसदस्य सञ्जयजयसवालस्य आवासस्थाने बिहारराज्यस्य राष्ट्रियजनतान्त्रिक-संयुते: सांसदानाम् उपवेशनं जातम्। उपवेशने एतस्मिन् भाजपेतिदलाध्यक्ष: जेपी नड्डा: जदयू-लोजपा-हिन्दुस्तान-आवाम-मोर्चा-राष्ट्रिय-लोकमोर्चा-इत्येतेषां दलानां वरिष्ठनेतृभि: साकं बिहारराज्यस्य भाजेपतिदलीया: सांसदा: भागं अगृह्णन्।

## विदेशमन्त्रालय:

विदेशमन्त्रालयेन ज्ञापितं यत् संयुक्तराष्ट्रान्ताराष्ट्रिय-धार्मिक-स्वतन्त्रता योग: चिन्ताजनक-एकांशरूपेण नामित: भवितव्य:। यू.एस्.सी.आई.आर्.एफ्. (USCIRF) इत्यनेन साम्प्रतिके समये अस्यवर्षस्य वार्षिक-प्रतिवेदनानां निष्कर्षान् परित्यज्य विदेशमन्त्रालयस्य प्रवक्ता रणधीर-जयसवाल: अवोचत् यत् अयम् आयोग: पक्षपातेन राजनीत्या च सह प्रेरिताकलनम् यथावदेव संस्थापयति।

## आईपीएल् क्रिकेट

आईपीएल् इत्येतस्या: क्रिकेट-स्पर्धामालिकाया: गुवाहाट्यां गतरात्रौ जते द्वन्द्वे कोलकातानाइटराइडर्स-दलेन राजस्थानरॉयल्सदलम् अष्टस्तोभै: पराजितम्। अद्य हैदराबादनगरे सनराइजर्स-हैदराबाददलस्य सामुख्यं लखनऊ-सुपर-जायन्ट्स दलेन सार्धं सायंकाले सार्धसप्तवादने सुनिश्चितमस्तीति।